# Dhumravarna Stuti by Devarshi

# ધૂમ્રવર્ણસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તા

## Document Information

Text title : Dhumravarna Stuti by Devarshi

File name : dhUmravarNastutiHdevarShibhiHproktA.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 8, Adhyaya 8

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# ધૂમ્રવર્ણસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તા

શિવ ઉવાચ -
શાન્તિરૂપધરં પૂર્ણં ગાણેશાહઙ્કૃતિસ્થિતમ્ ।
અહં દૃષ્ટ્વા સુરા વિપ્રા વિસ્મિતા અભવન્ દ્વિજાઃ । ૧
તતસ્તે ધૂમ્રવર્ણં વૈ પુપૂજુર્ભક્તિસંયુતાઃ ।
પુનઃ પ્રણમ્ય તં સર્વે તૂષ્ટુવુઃ કરસમ્પુટાઃ ॥ ૨॥

દેવર્ષય ઊચુઃ
અજાયાથ સર્વાદિપૂજ્યાય નિત્યં નિરાલમ્બનેતિ સ્વરૂપાય ઢુણ્ઢે ! ।
સદાઽવ્યક્તરૂપાય સર્વાન્તગાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૩॥

સદા મોહહીનાય મોહપ્રદાય જનેભ્યઃ પ્રભો! મોહહન્ત્રે નિજાનામ્ ।
મહાનન્દત્રૈવિધ્યભાવૈઃ પરેશ! નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૪॥

નમઃ સિદ્ધિબુદ્ધિપ્રદાત્રે ગણેશ! પુરે વાસકારિન્! સ્વસંવેદ્યનામ્નિ ।
અનાથાય નાથાય સર્વેશ્વરાણાં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૫॥

સદા સ્વેચ્છયા ખેલકારાય તુભ્યં સગૌણાય નૈર્ગુણ્યભાવાય બ્રહ્મન્! ।
મહાઽઽખુધ્વજાયાઽથ હેરમ્બકાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૬॥

ગજાકારતુણ્ડાય લમ્બોદરાય ત્રિનેત્રાય શૂર્પશ્રુતિક્ષોભકારિન્! ।
મદાસક્તયોગીન્દ્ર! ભૃઙ્ગાત્મકાનાં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૭॥

ચતુર્બાહવે ચૈકદન્તાય તુભ્યં વિચિત્રૈરનર્ઘૈસ્તુ સમ્ભૂષિતાય ।
અલઙ્કારકૈર્દેવદેવેશ! પાત્રે નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૮॥

ત્વયા સૃષ્ટમાદ્યં સમં સર્વભાવયુતં મોહદં માયિનાં નન્દનાદ્યૈ ।
તદાકારરૂપેણ તત્સ્થાય ભૂમ્ને નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૯॥

ત્વયા પ્રેરિતેનાથ તેનાઽપિ સૃષ્ટં સદાત્મસ્વરૂપં પરં જીવનં યત્ ।
અભેદાત્મકં તત્ર સંસ્થાય તુભ્યં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૦॥

તત્સ્તેન સૃષ્ટં સદા ભેદકાનાં નિજં દૈવતં બ્રહ્મભાવેન તત્સ્થમ્ ।
તદાકારરૂપેણ તત્સ્થાય બ્રહ્મન્! નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૧॥

અસદ્ભાવયુક્તેન સૃષ્ટં વિદેહં પરં બ્રહ્મ સાઙ્ખ્યાત્મકં મૂલબીજમ્ ।
ત્વયા પ્રેરિતેનાત્ર વાસપ્રદાયિન્નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૨॥

સ્વતોત્થાનરૂપં વિદેહેન સૃષ્ટં ત્વદીયપ્રબોધેન વિઘ્નેશ્વરાય ।
તદાકારરૂપાય તત્રસ્થકાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૩॥

તતસ્તેન તે સત્તયા સૃષ્ટમાદ્યં
સદૈકસ્વરૂપં પરં સોઽહમેવમ્ ।
તથા ત્વં ચ તત્રૈવ સંસ્થઃ પરાત્મન્!
નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૪॥

ત્વયા પ્રેરિતેનાથ તેનૈવ સૃષ્ટં ચતુર્ણાં પ્રમૂલં મહદ્બિન્દુરૂપમ્ ।
સદા સાહજેનૈવ યોગેન તત્સ્થો નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૫॥

તતો નાદરૂપં સમં યત્સુષુપ્તં પરં સૂક્ષ્મરૂપં તતઃ સ્થૂલભાવમ્ ।
સદા સાહજેનૈવ યોગેન તત્સ્થો નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૬॥

નમો વિશ્વરૂપાય સર્વાકરાય હ્યનન્તાનનાદ્યૈઃ સુચિહ્નાય તુભ્યમ્ ।
ચરૈઃ સ્થાવરૈર્ભોગભોગિન્! નમસ્તે નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૭॥

ચરાયાઽથ તે સ્થાવરાયૈવ તુભ્યં નમો સૃષ્ટિકર્ત્રે સુપાત્રે હરાય ।
પ્રકાશાય સૂર્યાય દેવીમયાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૮॥

નમો દેવપક્ષાય સાધ્યાય તુભ્યં નરાયાઽથ દેવેદ્ર! દેવાત્મકાય ।
દિગીશાય વૃક્ષાદિબીજાત્મકાય નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૧૯॥

નમઃ સર્પરૂપાય દૈત્યાત્મકાય સમુદ્રાદિનાનાપ્રભેદસ્થમૂર્તે! ।
અનન્તૈઃ સ્વરૂપૈઃ સદા ક્રીડસિ ત્વં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૨૦॥

તથાઽપિ ત્વમેવં તદાકારહીનઃ સદા સાહજેનૈવ યોગેન યોગિન્! ।
સ્વસત્તાત્મકાયૈવ તુભ્યં નમસ્તે નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૨૧॥

અતો વેદવાદા વિશેષેણ ધૂમ્રા ભવન્તિ હ્યહો વર્ણિતું તે સ્વરૂપમ્ ।
બુધૈઃ કથ્યસે ધૂમ્રવર્ણસ્તતસ્ત્વં નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૨૨॥

સુશાન્તિં ગતા વેદયોગીન્દ્રમુખ્યાસ્ત્વયિ બ્રહ્મનાથે સદા ધૂમ્રવર્ણમ્ ।
વયં કિં સ્તુવીમોઽલ્પબોધા નમસ્તે નમો ધૂમ્રવર્ણાય સર્વેશ્વરાય ॥ ૨૩॥

ધૂમ્રવર્ણ ઉવાચ -
સ્તોત્રં ભવત્કૃતં મે તુ ભવિષ્યતિ સુસિદ્ધિદમ્ ।
બ્રહ્મભૂયકરં વિપ્રા ભવિષ્યતિ ન સંશયઃ ॥ ૨૬॥

પુત્રપૌત્રકલત્રાદિ સૌખદં ધનધાન્યદમ્ ।
આયુરારોગ્યકૈશ્વર્યદાયકં પ્રભવિષ્યતિ ॥ ૨૭॥

પઠતે શ‍ૃણ્વતે દેવા નાનાભાવપ્રપૂરકમ્ ।
ધર્માર્થકામમોક્ષાણાં દાયકં ભજતામિદમ્ ॥ ૨૮॥

મારણોચ્ચાટનાદીનિ હ્યેકવિંશતિપાઠતઃ ।
એકવિંશતિભિર્નિત્યં દિવસૈઃ પ્રભવન્તિ હિ ॥ ૨૯॥

પરકૃત્યાદિકં સર્વં નાશમેતિ ન સંશયઃ ।
અનેન સ્તોત્રમુખ્યેન સ્તુવતઃ સર્વદા દ્વિજાઃ ॥ ૩૦॥

યં યં ચિન્તયેત્ કામં તં તં દાસ્યામિ સર્વદા ।
સ્તુતોઽનેન મહાદેવાઃ સ્તોત્રેણ તુષ્ટિમાગતઃ ॥ ૩૧॥

ઇતિ દેવર્ષિભિઃપ્રોક્તા ધૂમ્રવર્ણસ્તુતિઃ સમાપ્તા । ૮.૮

Encoded by Ajit Krishnan
Proofread by Ajit Krishnan, PSA Easwaran

*Dhumravarna Stuti by Devarshi*
pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*